श्री शिव द्वादशनाम स्तोत्रं

श्री शिव द्वादशनाम स्तोत्रं

प्रथमस्तु महादेवो द्वितीयस्तु महेश्वरः |
तृतीयः शंकरो ज्ञेयश्चतुर्थो वृषभध्वजः || 1 ||

पंचमः कृत्तिवासाश्च षष्ठः कामांगनाशनः |
सप्तमो देवदेवेशः श्रीकंठश्चाष्टमः स्मृतः || 2 ||

ईश्वरो नवमो ज्ञेयो दशमः पार्वतीपतिः |
रुद्र एकादशश्चैव द्वादशः शिव उच्यते || 3 ||

द्वादशैतानि नामानि त्रिसंध्यं यः पठेन्नरः |
कृतघ्नश्चैव गोघ्नश्च ब्रह्महा गुरुतल्पगः || 4 ||

स्त्रीबालघातुकश्चैव सुरापो वृषलीपतिः |
मुच्यते सर्वपाप्येभ्यो रुद्रलोकं स गच्छति || 5 ||

इति श्री शिव द्वादशनाम स्तोत्रं |